# Shri Ramasahasranama akSharapuShpAvaliH

# શ્રીરામસહસ્રનામાક્ષરપુષ્પાવલિઃ

## Document Information

Text title : rAmasahasranAmAkSharapuShpAvaliH

File name : rAmasahasranAmAkSharapuShpAvaliH.itx

Category : raama, puShpAshrIvatsan

Location : doc_raama

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : SriTyagaramaPushpavali 2005

Acknowledge-Permission: Copyright Pushpa Srivatsan

Latest update : November 25, 2017

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

May 31, 2021

sanskritdocuments.org

# શ્રીરામસહસ્રનામાક્ષરપુષ્પાવલિઃ

ૐ

શ્રીરામજયમ્

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

નમઃ શ્રીત્યાગરાજાય મદાચાર્યવરાય ચ ।
શ્રીસીતારામભક્તાય ગુરુદેવાય તે નમઃ ॥

ૐ સીતાવરાય વિદ્મહે । ત્યાગગેયાય ધીમહિ ।
તન્નો રામઃ પ્રચોદયાત્ ॥

અથ શ્રીરામસહસ્રનામાક્ષરપુષ્પાવલિઃ ।

અનન્યરામભક્તાય અક્ષરાવલિશક્તયે ।
અનન્યગુરુદેવાય અક્ષરાય નમો નમઃ ॥ ૧॥

આનન્દનાદરૂપાય આત્મપ્રકાશદીપિને ।
આદિદેવપ્રગેયાય આચાર્યાય નમો નમઃ ॥ ૨॥

શ્રીસીતારામગેયાય પુષ્પાવલિપ્રચોદિને ।
શ્રીત્યાગબ્રહ્મસન્નામ્ને સદ્ગુરુસ્વામિને નમઃ ॥ ૩॥

અમ્બાસીતામહાલક્ષ્મ્યૈ અક્ષરારમ્ભહૂતયે ।
અતિમઙ્ગલધાત્ર્યૈ ચ અતિભાયૈ નમો નમઃ ॥ ૪॥

અક્ષરાવલિપૂજ્યાય ક્ષરાન્તસ્થાક્ષરાત્મને ।
અક્ષરાવલિવાસાય શ્રીરામાય નમો નમઃ ॥ ૫॥

અદ્વૈતતત્ત્વસારાય અક્ષરાજાન્તરાત્મને ।
અચિન્ત્યચિન્ત્યરૂપાય સીતારામાય તે નમઃ ॥ ૬॥

અયોધ્યાનૃપપુત્રાય અવનીજાસુજાનયે ।
અસમાનપ્રભાવાય અભિરામાય તે નમઃ ॥ ૭॥

આનન્દકન્દમૂલાય આદ્યન્તરહિતાર્ચિષે ।
આશરાભાવભાવાય આત્મારામાય તે નમઃ ॥ ૮॥

ઇલાધિપાય ઇષ્ટાય ઇન્દુદ્યુમણિચક્ષુષે ।
ઇનવંશાબ્ધિચન્દ્રાય ઇક્ષ્વાકુભાતવે નમઃ ॥ ૯॥

ઈયસત્ત્વપ્રકાશાય ઈરણાત્મજવન્દિને ।
ઈશસન્નૂતસન્નામ્ને ઈશ્વરાય નમો નમઃ ॥ ૧૦॥

ઉત્તમશ્લોકપૂજ્યાય ઉત્તમાસક્તિદાયિને ।
ઉત્તમોત્તમગુણ્યાય ઉત્તમાય નમો નમઃ ॥ ૧૧॥

ઊષપ્રશાન્તિગેયાય ઊષકધ્યાતૃસેવિને ।
ઊષકસ્તુતગીતાય ઊષારામાય તે નમઃ ॥ ૧૨॥

ઋષિપૂજિતપાદાય ઋષિસન્નુતકીર્તયે ।
ઋષિમાનસવાસાય ઋતધામ્ને નમો નમઃ ॥ ૧૩॥

એકબ્રહ્મસ્વરૂપાય એકવાક્યાર્થકાય ચ ।
એકાન્તસ્વાનુભૂતાય એકાક્ષરાય તે નમઃ ॥ ૧૪॥

ઐકાગ્ર્યભક્તિગીતાય ઐકાન્તિકસુખાય ચ ।
ઐકાત્મ્યૈકાર્થદાત્રે ચ ઐકાન્તિકાય તે નમઃ ॥ ૧૫॥

ઓંકારવ્યક્તરૂપાય ઓંકારનાદશક્તયે ।
ઓંકારગુપ્તસત્ત્વાય ઓંકારબ્રહ્મણે નમઃ ॥ ૧૬॥

ઔજસ્યનામસારાય ઔજ્જ્વલ્યસત્યતેજસે ।
ઔષધીયસુનામપ્રભાવરામાય તે નમઃ ॥ ૧૭॥

કલ્યાણગુણસાન્દ્રાય કલ્યાણકીર્તિદાયિને ।
કલ્યાણરામચન્દ્રાય કલ્યાણીપતયે નમઃ ॥ ૧૮॥

કારુણ્યપૂર્ણવીક્ષાય કામાદિરિપુદારિણે ।
કામિતાર્થપ્રદાત્રે ચ કાલાતીતાય તે નમઃ ॥ ૧૯॥

કિરણાવલિમાલાય કીશસન્નુતતેજસે ।
કીર્તનૌઘનિમગ્નાય કીર્તિતાય નમો નમઃ ॥ ૨૦॥

કુન્દકુડ્મલદન્તાય કુટિલાલકશોભિને ।
કુણ્ડલીશસુશય્યાય કુલદૈવાય તે નમઃ ॥ ૨૧॥

કૂર્મમત્સ્યાવતારાય કૂવારશયનાય ચ ।
કૂટશસ્તોત્રમાલાય કૂટસ્થાય નમો નમઃ ॥ ૨૨॥

કૃષ્ણાવતારલીલાય કૃપણોધ્દ્ધારણાય ચ ।
કૃતાઞ્જલિપ્રસાદાય કૃપાલવે નમો નમઃ ॥ ૨૩॥

કેદારનાથનૂતાય કેવલજ્ઞાનદાયિને ।
કેદારસન્નિવાસાય કેશવાય નમો નમઃ ॥ ૨૪॥

કૈકેયીસુતપૂજ્યાય કૈટભારિસુકીર્તયે ।
કૈલાસનાથમોદાય કૈવલ્યદાયિને નમઃ ॥ ૨૫॥

કોટિશાજમનામ્ને ચ કોપતાપપ્રણાશિને ।
કોટિસૂર્યપ્રભાસાય કોદણ્ડપાણયે નમઃ ॥ ૨૬॥

કૌશલ્યાપ્રિયપુત્રાય કૌશિકાહવરક્ષિણે ।
કૌશેયપીતવાસાય કૌસ્તુભાઙ્ગાય તે નમઃ । ૨૭॥

ક્રમકાક્ષરગીતાય ક્રાન્તદર્શિપ્રસાદિને ।
ક્રિયાયોગોપદેશાય ક્રીડાવિનોદિને નમઃ ॥ ૨૮॥

ક્રૂરરાક્ષસહારાય ક્રોધમોહવિદારિણે ।
ક્રોડીકૃતાઞ્જનેયાય ક્લેશાપહાય તે નમઃ ॥ ૨૯॥

ક્વણદ્વીણાસ્વરસ્થાય ક્ષણક્ષણસ્મૃતાય ચ ।
ક્ષમસ્તોતૃમનઃસ્થાય ક્ષાન્તિમતે નમો નમઃ ॥ ૩૦॥

ક્ષિતિજાવરનાથાય ક્ષીરસાગરશાયિને ।
ક્ષુબ્ધમાનસશામ્યાય ક્ષેમંકરાય તે નમઃ ॥ ૩૧॥

ક્ષેત્રજ્ઞાયાતિદૈવાય ક્ષૈત્રજ્ઞાક્ષિપ્રદાય ચ ।
ક્ષૌમસંમૃદુવાચાય ક્ષ્માપુત્રીપતયે નમઃ ॥ ૩૨॥

ખગરાજતુરઙ્ગાય ખરદૂષણહારિણે ।
ખાણ્ડવસ્વાદુભાષાય ખ્યાતિદાત્રે નમો નમઃ ॥ ૩૩॥

ગઙ્ગાપ્રભાવપાદાય ગજેન્દ્રમોક્ષકારિણે ।
ગમ્ભીરદ્યુતિશોભાય ગરિષ્ઠાય નમો નમઃ ॥ ૩૪॥

ગાન્ધર્વગાનપૂજ્યાય ગાનમાધુર્યવાસિને ।

ગાનલોલાય ગેયાય ગાયત્રીગીતયે નમઃ ॥ ૩૫॥

ગિરીશપ્રિયસન્નામ્ને ગિરામાધુર્યભાષિણે ।
ગીર્વાણમુનિવન્દ્યાય ગીતાચાર્યાય તે નમઃ ॥ ૩૬॥

ગીતવાદ્યાભિનન્દાય ગીતસત્કૃતિમોદિને ।
ગુરુદેવાભિગીતાય ગુહારામાય તે નમઃ ॥ ૩૭॥

ગુહ્યાય ગુણસાન્દ્રાય ગુણાતીતસ્વરૂપિણે ।
ગુહ્યહૃત્સ્થલવન્દ્યાય ગૂઢોત્મને નમો નમઃ ॥ ૩૮॥

ગૃહદૈવાય ગેયાય ગેયરાજસ્તુતાય ચ ।
ગૈરિકીભવપાદાય ગોધૂલિશાન્તયે  નમઃ ॥ ૩૯॥

ગોવિન્દાય સુનન્દાય ગૌરીશમુદિતાત્મને ।
ગૌરાનનાય ગૌરાય ગૌરવકૃતયે નમઃ ॥ ૪૦॥

ગ્માપુત્રીમનઆભાય ગ્રથિતાક્ષરમાલિને ।
ગ્રન્થનાથાય ગ્રન્થાય ગ્લાનિચ્છિદે નમો નમઃ ॥ ૪૧॥

ઘટનાપરિપૂર્ણાય ઘનગાનપ્રસાદિને ।
ઘણ્ટારવાભિપૂજ્યાય ઘનશ્યામાય તે નમઃ ॥ ૪૨॥

ઘણ્ટાનાદસુગીતાય ઘનીકૃતાતિશક્તયે ।
ઘનાઘઘનઘાતાય ઘનસ્વરાય તે નમઃ ॥ ૪૩॥

ઘુષિતાદ્ભુતસન્નામ્ને ઘૂર્ણમાનસસાન્ત્વિને ।
ઘોરસંસારતારાય ઘૃણિને તે નમો નમઃ ॥ ૪૪॥

ઘૃણાપાઙ્ગસુરક્ષાય ઘૃણિવંશાતિભાતયે ।
ઘૃણાઘ્નઘૃણસાન્દ્રાય ઘૃણાલવે નમો નમઃ ॥ ૪૫॥

ચણ્ડભાસ્કરતેજાય ચન્દ્રભાસ્કરચક્ષુષે ।
ચણ્ડમારુતબાણાય ચન્દ્રાનનાય તે નમઃ    ॥ ૪૬॥

ચાપાલઙ્કૃતપાણાય ચારિત્રાદ્ભુતકીર્તયે ।
ચાયનીયપ્રશાન્તાય ચારુનેત્રાય તે નમઃ ॥ ૪૭॥

ચિરકાલસુગીતાય ચિન્તિતાર્ચિતચિત્તયે ।
ચિરસ્થાયિચરિત્રાય ચિત્સ્વરૂપાય તે નમઃ ॥ ૪૮॥

ચિદ્વિલાસાય ચિત્તાગોચરાય ચિન્તિતાય ચ ।
ચિત્તશોધનનામ્ને ચ ચિન્મયાય નમો નમઃ ॥ ૪૯॥

ચેતોહરાતિતેજાય ચેતનાચેતનાત્મને ।
ચેતોજાર્ચિતદૈવાય ચૈતન્યબ્રહ્મણે નમઃ ॥ ૫૦॥

ચૈત્રાવતારતારાય ચોદિતાનન્યભક્તયે ।
ચૌક્ષવ્યક્ત્યકલઙ્કાય ચ્યુતશ્રાયાય તે નમઃ ॥ ૫૧॥

છત્રચ્છાયાધિરાજાય છન્દસ્કૃતસ્તુતાય ચ ।
છન્દોવૃત્તસ્તુતિસ્થાય છન્દ્રાય તે નમો નમઃ ॥ ૫૨॥

છાયામણ્ડલવૃત્તાય છિદ્રહૃચ્છમનાય ચ ।
છુરિતાક્ષરમાલાય છન્દકાય નમો નમઃ ॥ ૫૩॥

જન્મમૃત્યુવિવર્જાય જરાધિવ્યાધિઘાતિને ।
જગન્નાથાય નીથાય જયરામાય તે નમઃ ॥ ૫૪॥

જગદાનન્દકારાય જાનકીજયજાનયે ।
જગન્મોહનરામાય જનાધારાય તે નમઃ ॥ ૫૫॥

જપ્યતારકનામ્ને ચ જપમન્ત્રસ્વરૂપિણે ।
જપાર્થાક્ષરરૂપાય જપ્તનામ્ને નમો નમઃ ॥ ૫૬॥

જલજારુણપાદાય જગદાત્મસ્વરૂપિણે ।
જલજાપ્તકુલાપ્તાય જલેશશાયિને નમઃ ॥ ૫૭॥

જાનકીસુકલત્રાય જાજીકુસુમધારિણે ।
જાનકીજાપસારાય જાગર્તયે નમો નમઃ ॥ ૫૮॥

જિતગૌતમશાપાય જિતેન્દ્રિયાય જિત્વને ।
જિતશઙ્કરચાપાય જિતસીતાય તે નમઃ ॥ ૫૯॥

જિતરામાય રામાય જિતશઙ્કરચેતસે ।
જિતાત્મને અજિત્યાય જિતકામાય તે નમઃ ॥ ૬૦॥

જીવાધારાય જીવાય જીવનાધારભાસવે ।
જીવશક્ત્યૈકજીવાય જીવનીયાય તે નમઃ ॥ ૬૧॥

જીવન્મુક્તપ્રગીતાય જુષ્ટસદ્ગુરુગીતયે ।
જૂર્ણિશ્લોકાતિદૈવાય જુષ્યરામાય તે નમઃ ॥ ૬૨॥

જૂર્ણિગઙ્ગાપ્રભાવાય જૃમ્ભપુષ્પાર્ચિતાય ચ ।
જૃમ્ભિતાવ્યક્તરૂપાય જેન્યાય તે નમો નમઃ ॥ ૬૩ ॥

જેત્રાય જૈવસર્વસ્મૈ જોષિકાર્ચિતતેજસે ।
જોટિઙ્ગધ્યાતસન્નામ્ને જ્ઞપ્ત્યતીતાય તે નમઃ ॥ ૬૪ ॥

જ્ઞાનાય જ્ઞાનગમ્યાય  જ્ઞાનાનન્દસ્વરૂપિણે ।
જ્ઞાનવૃદ્ધમનઃસ્થાય જ્ઞાનતેજાય તે નમઃ ॥ ૬૫ ॥

જ્ઞેયાય જ્ઞાતસર્વસ્મૈ જ્ઞીપ્સાપૂરણચક્ષસે ।
જ્યાઘોષબાણકોદણ્ડરામાય તે નમો નમઃ ॥ ૬૬ ॥

ઝઙ્કારશ્રુતિગીતાય ટઙ્કારઘોષધન્વને ।
ઝલ્લરીનાદમોદાય ઠક્કુરાકૃતયે નમઃ ॥ ૬૭ ॥

તન્ત્રીસુસ્વરલોલાય   તન્ત્રીસ્વરલયાય ચ ।
તન્ત્રીસઙ્ગીતમોદાય તન્ત્રીરાગાય તે નમઃ ॥ ૬૮ ॥

તાલવાદ્યાભિનન્દાય તારાધિપાનનાય ચ ।
તારકારામનામ્ને ચ તારણાય નમો નમઃ ॥ ૬૯ ॥

તિષ્યાય તિષ્યસન્નામ્ને તિષ્યકેતુસ્તુતાય ચ ।
તીર્થાતિતીર્થનામ્ને ચ તીર્ણભાવાય તે નમઃ ॥ ૭૦ ॥

તુમ્બુર્વાનૂતગીતાય તૂષ્ણીંસ્થપ્રણવાય ચ ।
તૃષ્ણાક્ષયાય તૃષ્યાય તૃપ્રકામાય તે નમઃ ॥ ૭૧ ॥

તેજોજિતાયુતાર્કાય  તેજસ્કરાય તેજસે ।
તોયાલયગભીરાય તોયાત્મને નમો નમઃ ॥ ૭૨ ॥

તૌર્યત્રિકાભિવન્દ્યાય તૌર્યત્રિકપ્રિયાય ચ ।
ત્યક્તસર્વસુહૃત્સ્થાય ત્યાગયુક્તાય તે નમઃ ॥ ૭૩ ॥

ત્યાગબ્રહ્મસુયુક્તાય ત્યાગરાજનુતાય ચ ।
ત્યાગબ્રહ્મસુવાક્સ્થાય શ્રીરામાય નમો નમઃ ॥ ૭૪ ॥

ત્યાગરાજેષ્ટદૈવાય ત્યાગરાજાર્ચિતાય ચ ।
ત્યાગરાજનુલોલાય શ્રીરામાય નમો નમઃ ॥ ૭૫ ॥

ત્યાગબ્રહ્મસુપક્ષાય ત્યાગરાજપ્રિયાય ચ ।

ત્યાગબ્રહ્મસમક્ષાય શ્રીરામાય નમો નમઃ ॥ ૭૬॥

ત્યાગરાજકૃતિસ્થાય ત્યાગસઙ્કીર્તિતાત્મને ।
ત્યાગબ્રહ્માત્મલીનાય શ્રીરામાય નમો નમઃ ॥ ૭૭॥

ત્રાણાનન્યાતિદૈવાય ત્રિવિધાસારભાસસે ।
ત્રિગુણાતીતસત્યાય શ્રીરામાય નમો નમઃ ॥ ૭૮॥

ત્રિલોકવન્દિતેશાય ત્રિતાપાર્તિવિદારિણે ।
ત્રિલોકાતીતદેવાય ત્રિવિક્રમાય તે નમઃ ॥ ૭૯॥

દક્ષશિક્ષકનૂતાય દમાદિશમદાયિને ।
દહરાકાશવાસાય દયાકૂટાય તે નમઃ ॥ ૮૦॥

દશાવતારલીલાય દશાશુભકરાય ચ ।
દશાનનવિદારાય દાશરથ્યર્કિને નમઃ ॥ ૮૧॥

દિવ્યવંશાદ્રિદીપાય દિષ્ણવે સર્વદિષ્ણવે ।
દિનાન્વયાબ્ધિચન્દ્રાય દિવ્યાય તે નમો નમઃ ॥ ૮૨॥

દિવ્યગઙ્ગાસમક્ષાય દિવ્યગઙ્ગાભિનન્દિને ।
દિવ્યપ્રયાગદૈવાય રઘુનાથાય તે નમઃ ॥ ૮૩॥

દીર્ઘાયુષ્પ્રદદૈવાય દીનાવનવ્રતાય ચ ।
દુઃખશોકનિવારાય દુરાસદાય તે નમઃ ॥ ૮૪॥

દુર્ગાભ્રાત્રે ચ દુર્ગાય દુર્ગહૈમાદ્રિરૂપિણે ।
દુર્ગાગઙ્ગાસુમાલાય દુર્ગાઢાય નમો નમઃ ॥ ૮૫॥

દૂરીકૃતાઘસઙ્ઘાય દૃઢવ્રતાભયાય ચ ।
દેહમાનસપોષાય દૃશાનાય નમો નમઃ ॥ ૮૬॥

દેવાદિમૃગ્યપાદાય દેવદેવાર્ચિતાય ચ ।
દેવકુલ્યાપ્રભાવાય દેવેશાય નમો નમઃ ॥ ૮૭॥

દૈવાય દૈત્યદારાય દોલારોપિતમૂર્તયે ।
દોલોત્સવસુગીતાય દોષહાય નમો નમઃ ॥ ૮૮॥

દૌર્બલ્યક્લાન્ત્યપોહાય દૌર્ગ્યવિદ્રાવણાય ચ ।
દ્યુસરિદ્ભાવભાવાય દ્યુતિધારાય તે નમઃ ॥ ૮૯॥

દ્યુતિમણ્ડલવૃત્તાય દ્યોતિતાન્તર્ગુહાય ચ ।
દ્રુતસિદ્ધિપ્રદાત્રે ચ દ્રુતબાણાય તે નમઃ ॥ ૯૦ ॥

દ્વન્દ્વાતીતાય દ્વન્દ્વાય દ્વન્દ્વદુઃખનિવારિણે ।
દ્વિકરેહપરાર્થાય  દ્વૈતાદ્વૈતાય તે નમઃ ॥ ૯૧ ॥

ધરણીધરધીરાય  ધરાધિપનુતાય ચ ।
ધરણીતનયાપાય ધર્માત્મને નમો નમઃ ॥ ૯૨ ॥

ધન્યાય ધર્મપાલાય   ધારાધરસ્વરાય ચ ।
ધારાધરાભગાત્રાય  ધાત્રે તુભ્યં નમો નમઃ ॥ ૯૩ ॥

ધિષ્ણ્યહૃત્સ્થલદૈવાય ધીમન્દિરનિવાસિને ।
ધીતાય ધીતિગીતાય ધીરોદાત્તાય તે નમઃ ॥ ૯૪ ॥

ધુનિનાથનિવાસાય  ધૂનનાત્મજસેવિને ।
ધૂપદીપાદિસેવ્યાય ધુરીણાય નમો નમઃ ॥ ૯૫ ॥

ધૃતકોદણ્ડચાપાય ધૃતિકારાય ધૃત્વને ।
ધૃતહસ્તસુનીથાય ધૃતાત્મને નમો નમઃ ॥ ૯૬ ॥

ધેયનામસુપેયાય ધૈર્યધૈવત્યધાય ચ ।
ધોરણીનામગેયાય ધૌતાત્મને નમો નમઃ ॥ ૯૭ ॥

ધ્યેયાય ધ્યાનગમ્યાય ધ્યાનસ્થાન્તર્વિલાસિને ।
ધ્યાયમાનાય રામાય ધ્યાતોંકારાય તે નમઃ ॥ ૯૮ ॥

ધ્રુવસિદ્ધિપ્રદાત્રે ચ ધ્રુવાક્ષરાન્તરાત્મને ।
ધ્વનિતોંકારનાદાય ધ્વનિરૂપાય તે નમઃ ॥ ૯૯ ॥

નતજીવનજીવાય નતમાનસસાન્ત્વિને ।
નમસ્કૃતાય નમ્યાય નન્દનીયાય તે નમઃ ॥ ૧૦૦ ॥

નતપોષણતોષાય નવનવ્યસુગીતયે ।
નતરાજાભિનૂતાય નરોત્તમાય તે નમઃ ॥ ૧૦૧ ॥

નરવેષધરાપાય નવમન્મથરૂપિણે ।
નલિનાક્ષવિશાલાય નરાનન્દાય તે નમઃ ॥ ૧૦૨ ॥

નાદસુસ્વરપૂજ્યાય નાદાનન્દલયાત્મને ।
નાદોપાસનતુષ્ટાય નાદરૂપાય તે નમઃ ॥ ૧૦૩ ॥

નારદાનન્દગેયાય નાગરાજસુશાયિને ।
નારદાગીતલોલાય નારાયણાય તે નમઃ ॥ ૧૦૪॥

નિગમાગમસારાય નિશ્ચલાનન્દચેતસે ।
નિજદાસસુરક્ષાય નિરામયાય તે નમઃ ॥ ૧૦૫॥

નિત્યનૂતનરૂપાય નિત્યોત્સવસવાય ચ ।
નિત્યત્વવરદાત્રે ચ નિત્યાનન્દાય તે નમઃ ॥ ૧૦૬॥

નિદ્રાલસ્યાતિદૂરાય નિગમાગમચારિણે ।
નિર્વાણફલદાત્રે ચ નિરઞ્જનાય તે નમઃ ॥ ૧૦૭॥

નીલનિર્મલરૂપાય નીરજાહ્લાદકારિણે ।
નીરદશ્યામશોભાય નીરજાક્ષાય તે નમઃ ॥ ૧૦૮॥

નુતિશ્રેષ્ઠસુગીતાય નૂપુરાનાદગામિને ।
નૂતનક્ષીરભક્ષાય નૂનંગોપ્ત્રે નમો નમઃ ॥ ૧૦૯॥

નૃત્યવાદ્યસુગીતાય નૃસિંહાવતરાય ચ ।
નૃપોત્તમાય નેત્રે ચ નેત્રાનન્દાય તે નમઃ ॥ ૧૧૦॥

નેત્રોત્સવસુરૂપાય નૈત્યસઙ્ગીતસિદ્ધયે ।
નૈગમાગમસત્ત્વાય નૈઃશ્રેયસાય તે નમઃ ॥ ૧૧૧॥

નૈત્યનૈર્મલ્યરૂપાય નૈષ્ઠ્યનૈષ્કર્મ્યસિદ્ધયે ।
નૈકાય એકવાચાય નૈકાત્મને નમો નમઃ ॥ ૧૧૨॥

નોદિતાખ્યાતધર્માય નોધાભક્તિપ્રગીતયે ।
નૌકાતારકનામ્ને ચ ન્યાયરૂપાય તે નમઃ ॥ ૧૧૩॥

પટ્ટાભિરામચન્દ્રાય પઙ્કજાક્ષીરતાય ચ ।
પવમાનસુતાપ્તાય પરિપૂર્ણાય તે નમઃ ॥ ૧૧૪॥

પરબ્રહ્મસ્વરૂપાય પરમાનન્દધીધયે ।
પઞ્ચાપગેશગીતાય પરેશાય નમો નમઃ ॥ ૧૧૫॥

પાપાભાવાય ભાવાય પાપભાવપ્રણાશિને ।
પાપસન્ધાવગઙ્ગાય પાવનાય નમો નમઃ ॥ ૧૧૬॥

પામરૌઘવિદૂરાય પાશબન્ધવિદારિણે ।

પામરાસુરભીમાય પાર્થિવીપતયે નમઃ ॥ ૧૧૭॥

પિતૃવાક્પરિપાલાય પીતામ્બરાબ્જમાલિને ।
પીઠહૃત્સન્નિવાસાય પીયૂષનિધયે નમઃ ॥ ૧૧૮॥

પુણ્યતીર્થસુનામ્ને ચ પુનર્જન્મનિવારિણે ।
પુરાણાય સુપુણ્યાય પુષ્પાર્ચિતાય તે નમઃ ॥ ૧૧૯॥

પૂર્ણાવતારપૂજ્યાય પૂર્ણેન્દુમુખભાતયે ।
પૂર્ણત્વદાય પૂર્ણાય પુર્ણાનન્દાય તે નમઃ ॥ ૧૨૦॥

પૃથુકીર્તિવિરાજાય પૃથુકીર્તિપ્રદાયિને ।
પૃષોદરાત્મજાપ્તાય પૃથિવીપતયે નમઃ ॥ ૧૨૧॥

પેલવાદ્ભુતપાદાય પેયપેયૂષવાણયે ।
પેશલારમ્યભાષાય પોતનાય નમો નમઃ ॥ ૧૨૨॥

પોતનોત્તમગેયાય પૌરસ્યધ્યાતમૂર્તયે ।
પૌરસ્યધૃતપાદાય પૌલસ્ત્યહારિણે નમઃ ॥ ૧૨૩॥

પ્રકૃતિવ્યક્તરૂપાય પ્રકૃત્યવ્યક્તશક્તયે ।
પ્રપન્નૈકશરણ્યાય પ્રપઞ્ચપાલિને નમઃ ॥ ૧૨૪॥

પ્રણતાત્મપ્રબોધાય પ્રકૃષ્ટાદ્ભુતકીર્તયે ।
પ્રક્ષીણનતપાપાય પ્રશાન્તાય નમો નમઃ ॥ ૧૨૫॥

પ્રાકૃતાપ્રાકૃતાભાય પ્રાંશુલક્ષણબાહવે ।
પ્રાચીનકાવ્યનાથાય પ્રાજ્ઞાય તે નમો નમઃ ॥ ૧૨૬॥

પ્રાઞ્જલિપ્રાણદાત્રે ચ પ્રાણિસદ્ગતિદાયિને ।
પ્રાક્સન્ધ્યાચારુગીતાય પ્રાણાત્મને નમો નમઃ ॥ ૧૨૭॥

પ્રાપ્તકામાય કામાય પ્રાર્થિતાર્થપ્રદાયિને ।
પ્રાર્થનાવરદૈવાય પ્રાર્થનીયાય તે નમઃ ॥ ૧૨૮॥

પ્રિયાભિરામરામાય પ્રીતસદ્ભક્તિગીતયે ।
પ્રેષ્ઠાય પ્રેક્ષણીયાય પ્રૌઢત્વસિદ્ધયે નમઃ ॥ ૧૨૯॥

ફણિનાથસુશય્યાય ફાલનેત્રસ્તુતાય ચ ।
ફુલ્લારવિન્દનેત્રાય ફુલ્લાનનાય તે નમઃ ॥ ૧૩૦॥

બદરીકાશ્રમસ્થાય નરનારાયણાય ચ ।
બદરીધામદૈવાય બદરીપાય તે નમઃ ॥ ૧૩૧॥

બલરામાવતારાય બલરામાનુજાય ચ ।
બલારોગ્યપ્રદાત્રે ચ બલિષ્ઠાય નમો નમઃ ॥ ૧૩૨॥

બાલાર્કસત્સુતેજાય બાલાર્કાભસુવાસિને ।
બાલલીલાભિનન્દાય બાલરામાય તે નમઃ ॥ ૧૩૩॥

બાણત્રાણસુશૌર્યાય બાષ્પકણ્ઠાભિગીતયે ।
બાહુદ્વિરદતુલ્યાય બાધાન્તકાય તે નમઃ ॥ ૧૩૪॥

બિલ્વાદિપત્રપૂજ્યાય બિલહૃત્સ્થલવાસિને ।
બિમ્બોષ્ઠસ્મિતવક્ત્રાય બિઠવેષ્ટાય તે નમઃ ॥ ૧૩૫॥

બીજપ્રણવનામ્ને ચ બીજાક્ષરનિવાસિને ।
બીજોંકારસ્થનાદાય બીજરૂપાય તે નમઃ ॥ ૧૩૬॥

બુદ્ધ્યતીતાય બુદ્ધાય બુધવૃન્દાવનાય ચ ।
બુદ્ધાવતારલીલાય બુધાનાય નમો નમઃ ॥ ૧૩૭॥

બૃહન્નાથાય નાથાય  બૈજિકોંકારરૂપિણે ।
બોધસદ્ગુરુરૂપાય બ્રહ્મતેજાય તે નમઃ ॥ ૧૩૮॥

બ્રહ્મત્વતત્ત્વરૂપાય બ્રહ્માનન્દપ્રકાશિને ।
બ્રહ્મૈકતથ્યબોધાય બ્રહ્મબીજાય તે નમઃ ॥ ૧૩૯॥

ભક્તાધીનાય ભદ્રાય ભક્તિસ્તુતિપ્રિયાય ચ ।
ભક્તાભીષ્ટપ્રદાત્રે ચ ભક્તાધીતાય તે નમઃ ॥ ૧૪૦॥

ભગભવ્યપ્રભાવાય ભવરોગનિવારિણે ।
ભગિનીરતનામ્ને ચ ભયાપહાય તે નમઃ ॥ ૧૪૧॥

ભવશોકવિરામાય ભવભવ્યપ્રદાયિને ।
ભવતારકસન્નામ્ને ચ ભવાપહાય તે નમઃ ॥ ૧૪૨॥

ભવચાપવિદારાય ભવસન્નુતકીર્તયે ।
ભવમાનસભાવાય  ભવપ્રિયાય તે નમઃ ॥ ૧૪૩॥

ભાવસ્થધ્યાતદૈવાય ભાવાકૂતસ્તુતાય ચ ।
ભાવસ્થિરાય ભાવાય ભામણ્ડલાય તે નમઃ ॥ ૧૪૪॥

ભાવનાવાય ભાવાય ભાવશુદ્ધિપ્રિયાય ચ ।
ભાવાભાવાય ભાવાય ભાવભાવાય તે નમઃ ॥ ૧૪૫॥

ભિષજ્યનાદસારાય ભીતિચ્છિદે પરૌજસે ।
ભીષ્મશ્લોકિતસન્નામ્ને ભીમાર્ચિતાય તે નમઃ ॥ ૧૪૬॥

ભુવનાધારમૂલાય  ભુવનત્રયપાલિને ।
ભુક્તિમુક્તિપ્રદાત્રે ચ ભુવનેશાય તે નમઃ ॥ ૧૪૭॥

ભૂપાલાર્ચિતભૂપાય ભૂમિજાનન્દવર્ધિને ।
ભૂજાહ્લાદનશૌર્યાય ભૂરિધામ્ને નમો નમઃ ॥ ૧૪૮॥

ભૃગુસૂનુધનુર્જેત્રે ભૃગુનન્દનરૂપિણે ।
ભૃત્યવાત્સલ્યભાષાય ભૃત્યસંરક્ષિણે નમઃ ॥ ૧૪૯॥

ભેષજામોદસન્નામ્ને ભૈરવીરાગરાગિણે ।
ભૈષજ્યરાગધામ્ને ચ ભૈષજાય નમો નમઃ ॥ ૧૫૦॥

ભોગરાજવિરાજાય ભોગતૃષ્ણાપહાય ચ ।
ભોગિભોજિસુવાહાય ભોગીન્દ્રશાયિને નમઃ ॥ ૧૫૧॥

ભૌપાલસાર્વભૌમાય ભૌલીરાગસ્તુતાય ચ ।
ભ્રમિમાનસસાન્ત્વાય ભ્રૂમધ્યસ્થાય તે નમઃ ॥ ૧૫૨॥

મઙ્ગલાનન્દરૂપાય મઙ્ગલાનન્દદાયિને ।
મઙ્ગલાનન્દનામ્ને ચ મઙ્ગલાય નમો નમઃ ॥ ૧૫૩॥

માનિતાઙ્કિતગુણ્યાય મામનોરમણાય ચ ।
માનિષાદાય માન્યાય મામનોનિધયે નમઃ ॥ ૧૫૪॥

મિત્રપુત્રસુમિત્રાય મિત્રવંશપ્રભાતયે ।
મિત્રોદયપ્રગીતાય મિત્રરત્નાય તે નમઃ ॥ ૧૫૫॥

મિષ્ટવાક્સ્તુતગીતાય મિષ્ટસઙ્ગીતતોષિણે ।
મિષ્ટસુસ્વરભાષાય મિષ્ટનામ્ને નમો નમઃ ॥ ૧૫૬॥

મિથ્યાપારૈકસત્યાય મીરપારપ્રકીર્તયે ।
મુક્તિકારકનામ્ને ચ મુક્તિધામ્ને નમો નમઃ ॥ ૧૫૭॥

મુક્તસદ્ગુરુગીતાય મુમુક્ષુશ્રાયકીર્તયે ।

મુનિભાવિતપાદાય મુનિવન્દ્યાય તે નમઃ ॥ ૧૫૮॥

મૂકવાક્પ્રદદૈવાય  મૂકવાક્સંસ્તુતાય ચ ।
મૂલાધારોત્થનાદાય મૂલસ્થાનાય તે નમઃ ॥ ૧૫૯॥

મૃગણાત્મપ્રબોધાય મૃગતૃષ્ણાપહાય ચ ।
મૃત્યુલોકભયાહન્ત્રે મૃતણ્ડભાસસે નમઃ ॥ ૧૬૦॥

મૃદુસત્ત્વસુભાષાય મૃદુમાનસવાસિને ।
મૃદુસઙ્ગીતતોષાય  મૃદુસ્વરાય તે નમઃ ॥ ૧૬૧॥

મૃદુસુસ્વરગીતાય મૃદઙ્ગલયમોદિને ।
મૃદુપલ્લવપાદાય મૃદ્વઙ્ગાય નમો નમઃ ॥ ૧૬૨॥

મેઘસ્વનગભીરાય મેધાશક્તિવિલાસિને ।
મેઘશ્યામાભવીરાય મેરુધીરાય તે નમઃ ॥ ૧૬૩॥

મૈથિલીપ્રાણનાથાય મૈત્રાવરુણગીતયે ।
મૈત્રીમયાય મૈત્રાય મૈથિલીશાય તે નમઃ ॥ ૧૬૪॥

મોહનાઙ્ગાય મોક્ત્રે ચ મોહકારાય મોહિને ।
મોહનારામરામાય મોહાપોહાય તે નમઃ ॥ ૧૬૫॥

મૌનધ્યેયાય ગેયાય મૌનિરાજસ્તુતાય ચ ।
મૌનમાનસવાસાય મૌનાર્ચિતાય તે નમઃ ॥ ૧૬૬॥

યદુશ્રેષ્ઠાવતારાય યાદવાય યશસ્વિને ।
યતિશ્રેષ્ઠસુગીતાય યાધવાય નમો નમઃ ॥ ૧૬૭॥

યતમાનસસંસ્થાય યતિસજ્જનસેવિને ।
યાન્તભાન્તનિશાન્તાય યાગસંરક્ષિણે નમઃ ॥ ૧૬૮॥

યુક્તમાનસપૂજ્યાય યુક્તપૂજાભિનન્દિને ।
યુક્તભૂજાભિરામાય યુક્તાય તે નમો નમઃ ॥ ૧૬૯॥

યેષ્ઠગઙ્ગાસુમૂલાય યોગક્ષેમાવહાય ચ ।
યોગીન્દ્રહૃન્નિવાસાય યોગારામાય તે નમઃ ॥ ૧૭૦॥

યોગિશ્રેષ્ઠાય યોગ્યાય યોગસઙ્ગીતસિદ્ધયે ।
યૌક્તિકસ્તુતિગીતાય યૌવનાય નમો નમઃ ॥ ૧૭૧॥

રઘુવંશલલામાય રમ્યશ્રીવાસચેતસે ।
રમણીયાનનાભાય રઘુરામાય તે નમઃ ॥ ૧૭૨॥

રાગરાગવિવર્જાય રાગરાગસુરૂપિણે ।
રાગવિદ્યાસુપૂજ્યાય રાગમૂલાય તે નમઃ ॥ ૧૭૩॥

રાગતાલગતિસ્થાય રાગસ્વરયુતાય ચ ।
રાગસઙ્ગીતલોલાય રામચન્દ્રાય તે નમઃ ॥ ૧૭૪॥

રાજરાજસુનેત્રાય રાજાધિરાજભાનિધે ।
રાજરાજસુપૂજ્યાય રાજશ્રેષ્ઠાય તે નમઃ ॥ ૧૭૫॥

રિપુસૂદનશૌર્યાય રીતિગઙ્ગાસુગીતયે ।
રુદ્રપ્રિયાય રુદ્રાય રૂપહર્ષાય તે નમઃ ॥ ૧૭૬॥

રૂપવદ્ભાર્યરામાય રેણુકાસુતરૂપિણે ।
રૈવતાજપ્તનામ્ને ચ રોગાપહાય તે નમઃ ॥ ૧૭૭॥

રોચમાનાય રોચાય રોમાઞ્ચનકરાય ચ ।
રોહિણીસુતરૂપાય રોદોધિપતયે નમઃ ॥ ૧૭૮॥

રૌદ્રાદિશત્રુદારાય રૌદ્રસંહતશત્રવે ।
રૌક્મપત્નીકરામાય રૌક્મગુણ્યાય તે નમઃ ॥ ૧૭૯॥

લક્ષ્મીરમણપુણ્યાય લક્ષણાઙ્કિતરૂપિણે ।
લક્ષ્મણાનુજસેવ્યાય લક્ષણ્યાય નમો નમઃ ॥ ૧૮૦॥

લક્ષ્યાય લગનીયાય લઙ્કેશસંહરાય ચ ।
લલિતામોદગુણ્યાય લઘુગીતાય તે નમઃ ॥ ૧૮૧॥

લાલસાપૂર્ણરામાય લાવણ્યરામમૂર્તયે ।
લાલિતાનન્દરામાય લાસ્યગીતાય તે નમઃ ॥ ૧૮૨॥

લિપિરૂપવિલાસાય લિઙ્ગરૂપિપ્રિયાય ચ ।
લિપ્તાનુરાગસારાય લિપ્યર્ચિતાય તે નમઃ ॥ ૧૮૩॥

લીનમાનસલીનાય લીનસુસ્વરગીતયે ।
લીલાચતુરરામાય લીલાવતારિણે નમઃ ॥ ૧૮૪॥

લુપ્તલોભાદિદોષાય લુબ્ધાર્થપરદાયિને ।
લુલિતાન્તઃપ્રશાન્તાય લુબ્ધાર્થાય નમો નમઃ ॥ ૧૮૫॥

લૂનભક્તાઘસઙ્ઘાય લૂનપુષ્પાર્ચિતાય ચ ।
લૂષશ્લોકાક્ષરાભાય લૂષાર્કમાલિને નમઃ ॥ ૧૮૬॥

લેખિતશ્લોકધારાય લેખનીયાય લેખિને ।
લેખનાય ચ લેખ્યાય લેખસંસ્થાય તે નમઃ ॥ ૧૮૭॥

લોકાવનાય લોક્યાય લોકત્રાણાવતારિણે ।
લોલુપાપરિપૂર્ણાય લોકનાથાય તે નમઃ ॥ ૧૮૮॥

લૌક્યાતીતપ્રભાવાય લૌકિકાલૌકિકાત્મને ।
લૌકિકાર્તિનિવારાય લોકંપૃણાય તે નમઃ ॥ ૧૮૯॥

વંશીસઙ્ગીતલોલાય વંશીધરાવતારિણે ।
વંશપ્રકાશદીપાય વંશોદ્ધારાય તે નમઃ ॥ ૧૯૦॥

વનવાસાતિતોષાય વન્દારુગણવન્દિને ।
વન્દ્રગેયાય વન્દ્યાય વનજાક્ષાય તે નમઃ ॥ ૧૯૧॥

વટપત્રસુશય્યાય વરાહાવતરાય ચ ।
વરદાય વરિષ્ઠાય વરાનન્દાય તે નમઃ ॥ ૧૯૨॥

વાક્પત્રામોદશય્યાય વાચામગોચરાય ચ ।
વાક્સમ્પત્તિવિધાત્રે ચ વાગમ્બરાય તે નમઃ ॥ ૧૯૩॥

વાસવાદ્યભિપૂજ્યાય વામનાવતરાય ચ ।
વાસનાપરિધાવાય વાસુદેવાય તે નમઃ ॥ ૧૯૪॥

વાયુભોજિસુશય્યાય વાયુપુત્રનુતાય ચ ।
વાતરાયણવીરાય વાતાલયાય તે નમઃ ॥ ૧૯૫॥

વિરાજરાજપૂજ્યાય વિજિતાત્મકૃપાલવે ।
વિભીષણશરણ્યાય વિશ્રામાય નમો નમઃ ॥ ૧૯૬॥

વિનતાસુતવાહાય વિશ્વરૂપાય વિષ્ણવે ।
વિષયાસક્તિદૂરાય વિશ્વનાથાય તે નમઃ ॥ ૧૯૭॥

વીતરાગવિરોધાય વિમલાય વિભાય ચ ।
વીતરાગૈકરાગાય વીતશોકાય તે નમઃ ॥ ૧૯૮॥

વેદવેદાન્તસારાય વેદવેદ્યાય વેધસે ।

વેઙ્કટાદ્રિનિવાસાય વેઙ્કટેશાય તે નમઃ ॥ ૧૯૯॥

વૈદેહીભાગ્યભોગ્યાય વૈભોગરઙ્ગશાયિને ।
વૈરાગ્યત્યાગરૂપાય વૈકુણ્ઠપતયે નમઃ ॥ ૨૦૦॥

વ્યક્તાવ્યક્તસુરૂપાય વ્યાધ્યાધ્યાર્ત્યપહારિણે ।
વ્યાપ્તસર્વસ્વરૂપાય વ્યાસસ્તુતાય તે નમઃ ॥ ૨૦૧॥

શઙ્કરાલીનસન્નામ્ને શઙ્ખચક્રાદિધારિણે ।
શસ્તતારકનામ્ને ચ શરદાભાય તે નમઃ ॥ ૨૦૨॥

શરજાનનશોભાય શરનૈપુણ્યકીર્તયે ।
શરણાગતરક્ષાય શરણ્યાય નમો નમઃ ॥ ૨૦૩॥

શાપમોચનપાદાય શાન્તસૌખ્યાવહાય ચ ।
શામ્ભવીરતસન્નામ્ને શાન્તિભૂષાય તે નમઃ ॥ ૨૦૪॥

શિવારામસુનામ્ને ચ શિવપ્રિયશિવાય ચ ।
શિવરામાભિરામાય શિવંકરાય તે નમઃ ॥ ૨૦૫॥

શીકાગઙ્ગાભિષિક્તાય શીકરસ્પર્શશાન્ત્વિને ।
શીકારદૃષ્ટિદીક્ષાય શીલવૃત્તાય તે નમઃ ॥ ૨૦૬॥

શુભાકરાય શુભ્રાય શુભાઙ્કિતસુરૂપિણે ।
શુક્તિબીજસ્મિતાભાય શુચિવ્રતાય તે નમઃ ॥ ૨૦૭॥

શૂન્યાપહાય શૂરાય શૃઙ્ગારશેખરાય ચ ।
શૃઙ્ગારગુણધામ્ને ચ શૃઙ્ગારહરયે નમઃ ॥ ૨૦૮॥

શેષતુલ્યસુપાણાય શેષશ્વાસાર્ચિતાય ચ ।
શેષતલ્પસુશય્યાય શેષાચલાય તે નમઃ ॥ ૨૦૯॥

શૈલોત્તુઙ્ગસુપુણ્યાય શૈલસારસુધર્મિણે ।
શૈલોત્સઙ્ગગભીરાય શૈથિલ્યહાય તે નમઃ ॥ ૨૧૦॥

શોકતૌષારસૂર્યાય શ્લોકિતસ્વસુકીર્તયે ।
શોકોદ્ભૂતસુકાવ્યાય શ્લોકપ્રિયાય તે નમઃ ॥ ૨૧૧॥

શૌભાય શૌર્યગુણ્યાય શ્યામમેઘસ્વનાય ચ ।
શ્યામસુન્દરગાત્રાય શ્યામાભાય નમો નમઃ ॥ ૨૧૨॥

શ્રદ્ધાલુસિદ્ધિદાત્રે ચ શ્રાન્તસંવાહનાય ચ ।
શ્રાવિતસ્વચરિત્રાય શ્રિતાવનાય તે નમઃ ॥ ૨૧૩॥

શ્રીહયગ્રીવરૂપાય શ્રીમાનસવિલાસિને ।
શ્રીરઙ્ગપુરિવાસાય શ્રીલક્ષ્મીપતયે નમઃ ॥ ૨૧૪॥

શ્રીરમ્યચિત્તરમ્યાય શ્રીશસાનન્દવાગ્મિને ।
શ્રીમણ્યઙ્કિતવક્ષાય શ્રીનિવાસાય તે નમઃ ॥ ૨૧૫॥

શ્રુતિતાલસ્વરૂપાય શ્રુતિસઙ્કુલવાસિને ।
શ્રુતિશુદ્ધસુગીતાય શ્રુત્યાધારાય તે નમઃ ॥ ૨૧૬॥

શ્રેષ્ઠાય શ્રેષ્ઠનામ્ને ચ શ્રેષ્ઠસઙ્ગીતકીર્તયે ।
શ્રેષ્ઠચારિત્રપુણ્યાય શ્રેષ્ઠોત્કૃષ્ટાય તે નમઃ ॥ ૨૧૭॥

શ્રૈષ્ઠ્યદૈવત્યપૂર્ણાય શ્રોત્રાભિરામકણ્ઠિને ।
શ્રોત્રપેયૂષભાષાય શ્રીરામાય નમો નમઃ ॥ ૨૧૮॥

ષટ્ચક્રશક્તિમૂલાય ષટ્શત્રુસૂદનાય ચ ।
ષડ્જાધારશ્રુતિસ્થાય શ્રીરામાય નમો નમઃ ॥ ૨૧૯॥

ષાડવૌડવરાગાય ષોડશોપચરાય ચ ।
ષોડશાર્ચિતદૈવાય શ્રીરામાય નમો નમઃ ॥ ૨૨૦॥

સકલાગમસારાય સકલાર્થપ્રદાયિને ।
સકલાધારમૂલાય સકલાર્થાય તે નમઃ ॥ ૨૨૧॥

સકલાવનદૈવાય સનકાદિનુતાય ચ ।
સકલાર્તિનિવારાય સકલાપ્તાય તે નમઃ ॥ ૨૨૨॥

સત્કારુણ્યાય સદ્ભાય સદ્ગઙ્ગાજનકાય ચ ।
સદ્ભક્તાર્ણવસોમાય સનાતનાય તે નમઃ ॥ ૨૨૩॥

સદાગતિજદાસાય સદાનન્દસ્વરૂપિણે ।
સદાત્માનન્દભાસાય સદારામાય તે નમઃ ॥ ૨૨૪॥

સપ્તસ્વરસુભૂષાય સપ્તસ્વરસમષ્ટયે ।
સપ્તસ્વરસુભાષાય સપ્તસ્વરધયે નમઃ ॥ ૨૨૫॥

સઙ્ગીતસ્વરનન્દાય સઙ્ગીતપ્રાપ્તિદાયિને ।
સઙ્ગીતસ્વરમિષ્ટાય સઙ્ગીતાય નમો નમઃ ॥ ૨૨૬॥

સત્યસન્ધાય સત્યાય સત્યપ્રકાશભાસિને ।
સત્યવાક્સત્યરૂપાય સત્યકામાય તે નમઃ ॥ ૨૨૭॥

સત્ત્વાય સત્ત્વરૂપાય સત્ત્વતત્ત્વપ્રકાશિને ।
સત્ત્વારિદૈત્યદારાય  સત્ત્વાતીતાય તે નમઃ ॥ ૨૨૮॥

સર્વસ્મૈ સર્વસારાય સર્વમન્ત્રસ્વરૂપિણે ।
સર્વાભીષ્ટપ્રદાત્રે ચ સર્વોન્નતાય તે નમઃ ॥ ૨૨૯॥

સહસ્રાતીતનામ્ને ચ સહસ્રશ્લોકકીર્તયે ।
સહસ્રિયકૃતિસ્થાય  સહસ્રાકૃતયે નમઃ ॥ ૨૩૦॥

સાધુમાનસગેહાય સાકેતપુરિવાસિને ।
સારસાક્ષમુખાભાય સારસારાય તે નમઃ ॥ ૨૩૧॥

સાધુરૂપવનસ્થાય સાલસમ્પાટનાય ચ ।
સાધુસજ્જનજીવાય સાનન્દાય નમો નમઃ ॥ ૨૩૨॥

સામાદિનિગમાર્થાય સામગાનપ્રિયાય ચ ।
સામાનસાર્ણવાબ્જાય સારામાય નમો નમઃ ॥ ૨૩૩॥

સિદ્ધપ્રિયાય સિદ્ધાય સિદ્ધિસદ્ભુક્તિદાયિને ।
સિદ્ધસદ્ગુરુગેયાય સિદ્ધારામાય તે નમઃ ॥ ૨૩૪॥

સીતાહૃત્સારસાર્કાય સીતામનોહરાય ચ ।
સીતાસાધ્વીસુદારાય સીતારામાય તે નમઃ ॥ ૨૩૫॥

સુમનોજનમિત્રાય સુધાસારસુભાષિણે ।
સુસ્વરાજિતકંદાય સુરારામાય તે નમઃ ॥ ૨૩૬॥

સૂર્યવંશાદ્રિદીપાય સૂર્યચન્દ્રપ્રભાસસે ।
સૂત્રધારાય સૂરાય સૂરિનામ્ને નમો નમઃ ॥ ૨૩૭॥

સૃષ્ટિસ્થિત્યન્તકારાય  સેવિતસ્તુતિમાલિને ।
સેવિકાનન્દદાત્રે ચ સેવારામાય તે નમઃ ॥ ૨૩૮॥

સોત્કણ્ઠેષ્ટવરાધાત્રે સોત્કૃષ્ટશક્તિદાયિને ।
સોહઁલ્લયાત્મલીનાય સોહંભાવાય તે નમઃ ॥ ૨૩૯॥

સૌમિત્રિસુપ્રિયાપ્તાય સૌદામનીયભાસસે ।

સૌમઙ્ગલપ્રદાત્રે ચ સૌમ્યાય તે નમો નમઃ ॥ ૨૪૦॥

સ્નાતગઙ્ગાસુખાદાત્રે સ્થાવરાસ્થાવરાત્મને ।
સ્વીકૃતાનન્યભક્તાય સ્વરાનન્દાય તે નમઃ ॥ ૨૪૧॥

સ્વરાન્તસ્થસ્વરાભાય સ્વરમાધુર્યસેવિને ।
સ્વરાકાશપ્રદીપાય સ્વરારામાય તે નમઃ ॥ ૨૪૨॥

સ્ફુરત્સહસ્રનામ્ને ચ સ્વપ્રકાશજિતાગ્નયે ।
સ્વતન્ત્રાય સ્વમન્ત્રાય સ્વાત્મારામાય તે નમઃ ॥ ૨૪૩॥

હરિરામાવતારાય હરિનારાયણાય ચ ।
હરિગોવિન્દકૃષ્ણાય હરયે બ્રહ્મણે નમઃ ॥ ૨૪૪॥

હંસાય હંસગુહ્યાય હર્ષોત્કર્ષપ્રભાવિને ।
હંસાનન્દપ્રકાશાય હંસારામાય તે નમઃ ॥ ૨૪૫॥

હિમાલયપ્રશાન્તાય હિમગઙ્ગાપ્રભૂતયે ।
હિમાલયગભીરાય હિમાલયાય તે નમઃ ॥ ૨૪૬॥

હૃજ્જગઙ્ગાભિષિક્તાય હૃદ્ગભીરાર્ચિતાય ચ ।
હૃલ્લસત્સત્સુદીપાય હૃત્સેવિતાય તે નમઃ ॥ ૨૪૭॥

હૃદ્ગુહાસન્નિવાસાય હૃદ્ગુહાદીપનાય ચ ।
હૃદન્તરઙ્ગદૈવાય હૃદારામાય તે નમઃ ॥ ૨૪૮॥

હૃદયાલયપૂજ્યાય હૃદયાલયવાસિને ।
હૃદયાલયદીપાય હૃદાલયાય તે નમઃ ॥ ૨૪૯॥

હૃત્સ્થસદ્ગુરુરૂપાય હૃત્સારસાર્ચિતાય ચ ।
હૃત્પુષ્પામોદવાસાય હૃદ્ગતાય નમો નમઃ ॥ ૨૫૦॥

પુષ્પાવલિસુરાગાય પુષ્પામોદસ્તુતાય ચ ।
પુષ્પાર્ચિતપદાબ્જાય સીતારામાય મઙ્ગલમ્ ॥ ૨૫૧॥

મઙ્ગલમ્ અવનીજાયૈ મઙ્ગલં રામમૂર્તયે ।
માત્રે સુમઙ્ગલં પિત્રે સીતારામાય મઙ્ગલમ્ ॥ ૨૫૨॥

મઙ્ગલં રામભદ્રાય મઙ્ગલશ્લોકકીર્તયે ।
મઙ્ગલશ્રીનિવાસાય સીતારામાય મઙ્ગલમ્ ॥ ૨૫૩॥

મઙ્ગલં ભૂમિજાપાય મઙ્ગલં ભૂસુપાલિને ।
મઙ્ગલં દિવ્યગઙ્ગાય વિષ્ણવે શુભમઙ્ગલમ્ ॥ ૨૫૪॥

સીતારામાત્મલીનાય પુષ્પાવલિપ્રમોદિને ।
ત્યાગબ્રહ્મગુરુસ્વામિપાદપુષ્પાય મઙ્ગલમ્ ॥ ૨૫૫॥

શ્રીરામનામસત્કીર્તિરક્ષરાવલિસંસ્તુતિઃ ।
નામપુષ્પાર્ચનપ્રાપ્તિર્ભગભવ્યસુમઙ્ગલમ્ ॥ ૨૫૬॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા
અનુરાગેણ કૃતા શ્રીરામસહસ્રનામાક્ષરપુષ્પાવલિઃ ગુરૌ સમર્પિતા ।

ॐ

શુભમસ્તુ ।

Source: Shri Tyagarama Pushpavali 2005
Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*Shri Ramasahasranama akSharapuShpAvaliH*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on May 31, 2021
Please send corrections to *sanskrit@cheerful.com*